र्युक्षणी। वरस्य अन्वारब्धे। दक्षिणं जान्वाच्य स्रुवेण होमः। मनसा ध्यायं प्रजापतिं। होमः।
ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम। पूर्वे होमः। उत्तर विभागे। ॐ इन्द्राय स्वाहा। इ
दमिन्द्राय न मम। पश्चिमात्पूर्वे होमः। दक्षिण विभागे ॐ अग्नये स्वाहा। इदमग्नये न मम।
आघारौ ७
पूर्वे। उत्तरे। ॐ सोमाय स्वाहा। इदं सोमाय न मम। दक्षिण पूर्वार्द्धे। पश्चिमे होमः। आज्य
भागौ। आहुती हुत्वे त्यं तं संस्रव प्रोक्षणी पात्रे निधाय। प्रणव पूर्वकं जुहुयात्। ॐ भूः स्वा
हा। इदमग्नये न मम। भुवः स्वाहा। इदं वायवे न मम। ॐ स्वः स्वाहा। इदं सूर्याय न मम।
८
तयोत्तरेण। महाव्याहृतयस्तिस्रः। ॐ त्वन्नो अग्ने व० स्म त्स्वाहा। इदमग्नीवरुणाभ्यां न मम।
१ ~~त्वंनो अग्ने सत्वंनो अग्ने~~ १ त्वंनः सत्वंनः इति द्वे वामदेवदृष्टत्रिष्टुभौऽग्नावारुण्यौ त्रिपशौ। १

१ अयाश्चाग्नेरस्य वामदेव ऋषिः त्रिष्टुप् छन्दः अग्निः प्रायश्चित्तहोमे वि॰१
२ ये ते शतमिति त्र्यवामदेवस्य ऋषिः त्रिष्टुप् छन्दः लिंगोक्ता देवता सर्वप्रायश्चित्ते हवने वि॰२

ॐ स त्वं नो अवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ। अव यक्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि स्वाहा। इदमग्नीवरुणाभ्यां न मम। ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्य मित्वमया असि। अया नो यज्ञं वहास्यया नो धेहि भेषजं स्वाहा। इदमग्नये अयासे न मम।
ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः। तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यो न मम। ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय। अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा। इदं वरुणायादितये न मम। पंच वारुणकसर्वप्रायश्चित्तं नाम। विवाहे आवापस्थानानि। ऋताषाडित्याद्यष्टौ राष्ट्रभृतः। ततो जयाः। तत्र प्रयोगः। ऋताषाडृतधामाग्निर्गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्। इदमृतासाहे ऋतधाम्ने अग्नये गन्धर्वाय न मम। तस्यौषधयोऽप्सरसो मुदो नाम ताभ्यः स्वाहा। इदमोषधिभ्योऽप्सरोभ्यो मुद्भ्यो न मम।२। संहितो विश्वसामा सूर्यो गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्। इदं संहिताय विश्वसाम्ने सूर्याय

ऋताषाडिति परमेष्ठी ऋषिः गन्धर्वाप्सरसो देवताः रा॰४

17

१ उदुत्तममिति शुनःशेपो वारुणी त्रिष्टुप् प्रा॰

गंधर्वायनमम।३।तस्यमरीचयोप्सरस आयुवोनामताभ्यःस्वाहा।इदंमरीचिभ्योप्स
रोभ्यआयुभ्योनमम।४।सुषुम्णःसूर्यरश्मिश्चंद्रमागंधर्वःसनइदंब्रह्मक्षत्रंपातुतस्मै
स्वाहावाट्।इदंसुषुम्णायसूर्यरश्मयेचंद्रमसेगंधर्वाय।५।तस्यनक्षत्राण्यप्सरसो
भेकुरयोनामताभ्यःस्वाहा।इदंनक्षत्रेभ्योप्सरोभ्योभेकुरिभ्योनमम।६।इषिरोवि
श्वव्यचावातोगंधर्वःसनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्।इदमिषिरायविश्वव्य
चसेवातायगंधर्वायनमम।७।तस्यापोअप्सरसऊर्जोनामताभ्यःस्वाहा।इदमद्भ्यो
प्सरोभ्यऊर्ग्भ्योनमम।८।भुज्युःसुपर्णोयज्ञोगंधर्वःसनइदंब्रह्मक्षत्रंपातुतस्मैस्वा
हावाट्।इदंभुज्यवेसुपर्णाययज्ञायगंधर्वायनमम।९।तस्यदक्षिणाअप्सरसस्ता
वानामताभ्यःस्वाहा।इदंदक्षिणाभ्योप्सरोभ्यस्तावाभ्योनमम।१०।प्रजापतिर्विश्वक
र्मामनोगंधर्वःसनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्।इदंप्रजापतयेविश्वकर्म

२चित्तमित्यादि द्वादशमंत्रा एषांपरमेष्ठी यजुर्लिंगोक्ताजयाहोमेवि·२

ो मनसे गंधर्वाय।१२।तस्य ऋक्सामान्यप्सरस एष्टयो नाम ताभ्यः स्वाहा। इदमृक्सा
मेभ्योप्सरोभ्य एष्टिभ्यो न मम।१३। इति राष्ट्रभृद्धोमः॥ अथ जयाहोमः॥ चित्ताय स्वाहा।
इदं चित्ताय न मम।१। चित्त्यै स्वाहा। इदं चित्त्यै न मम।२। आकूताय स्वाहा। इदमाकूता
य न मम।३। आकूत्यै स्वाहा। इदमाकूत्यै न म।४। विज्ञाताय स्वाहा। इदं विज्ञाता य
न मम।५। विज्ञात्यै स्वाहा। इदं विज्ञात्यै न मम।६। मनसे स्वाहा। इदं मनसे न मम।७।
शक्वरीभ्यः स्वाहा। इदं शक्वरीभ्यो न मम।८। दर्शाय स्वाहा। इदं दर्शाय न मम।९।
पौर्णमासाय स्वाहा। इदं पौर्णमासाय न मम।१०। बृहते स्वाहा। इदं बृहते न मम।११।
रथंतराय स्वाहा। इदं रथंतराय न मम।१२। प्रजापतिर्जयानिंद्राय वृष्णे प्रायच्छदुग्रः
पृतनाजयेषु। तस्मै विशः समनमंत सर्वाः स उग्रः स इहव्यो बभूव स्वाहा। इदं प्र
जापतये न मम।१३। एते जयाहोमः। अथ अभ्यातानहोमः॥ अग्निर्भूतानामधिप

अग्निर्भूतानामित्यष्टादशानां प्रजापतिः पंक्तिः लिंगोक्ताअभ्यातानहोमेवि·१

शिव·
॥१८॥

18

तिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देव
हूत्यां स्वाहा। इदमग्नये भूतानामधिपतये न मम।१। इंद्रो ज्येष्ठानामधिपतिः समा०
हा। इदमिंद्राय ज्येष्ठानामधिपतये न मम।२। यमः पृथिव्या नामधिपतिः समा०
हा। इदं यमाय पृथिव्या अधिपतये न मम।३। उदकोपः। वायुरंतरिक्षस्याधिप
तिः समावत्व० हा। इदं वायवेंतरिक्षस्याधिपतये न मम।४। सूर्यो दिवोधिपतिः
समावत्व० हा। इदं सूर्याय दिवोधिपतये न मम।५। चंद्रमा नक्षत्राणामधिपतिः स
मावत्व० हा। इदं चंद्रमसे नक्षत्राणामधिपतये न मम।६। बृहस्पतिर्ब्रह्मणोधिप
तिः समावत्व० हा। इदं बृहस्पतये ब्रह्मणोधिपतये न मम।७। मित्रः सत्यानामधि
पतिः समावत्व० हा। इदं मित्राय सत्यानामधिपतये न मम।८। वरुणोपामधिपतिः स
मावत्व० हा। इदं वरुणायापामधिपतये न मम।९। समुद्रः स्रोत्यानामधिपतिः

ज्येष्ठा

समावत्व॰हा।इदंसमुद्रायस्त्रोत्यानामधिपतयेनममा।१०।अन्नं॰साम्राज्यानाम
धिपतिःसमावत्व॰हा।इदमन्नायसाम्राज्यानामधिपतयेनमम।११।सोमओष
धीनामधिपतिःसमावत्व॰हा।इदंसोमायौषधीनामधिपतयेनमम।१२।सवि
ताप्रसवानामधिपतिःसमावत्व॰हा।इदंसवित्रेप्रसवानामधिपतयेनमम।१३।
रुद्रःपशूनामधिपतिःसमावत्व॰हा।इदंरुद्रायपशूनामधिपतयेनमम।१४।उद
कोपः।त्वष्टारूपाणामधिपतिःसमावत्व॰हा।इदंत्वष्ट्रेरूपाणामधिपतयेनमम।१५।
विष्णुःपर्वतानामधिपतिःसमावत्व॰हा।इदंविष्णवेपर्वतानामधिपतयेनमम॥१६।
मरुतोगणानामधिपतयस्तेमावंत्व॰हा।इदंमरुद्भ्योगणानामधिपतिभ्योनमम।१७।
पितरःपितामहाःपरेवरेततास्ततामहाः।इहमावत्व॰हा।इदंपितृभ्यःपिता
महेभ्यःपरेभ्योपरेवरेभ्यःस्ततेभ्यःस्ततामहेभ्योनमम।१८।उदकोपः।एतेअभ्या

तन्मा२
शिव॰
॥१९॥

॰अग्निरैतुचतुर्णांप्रजापतिस्त्रिष्टुप्लिंगोक्ता आज्यहोमे वि॰।१
७ परंमृत्योसंकसुकत्रिष्टुप्मृत्यु राज्यहोमे वि॰

ताहोमः॥ॐअग्निरैतुप्रथमोदेवतानां॰सोस्यैप्रजांमुंचतुमृत्युपाशात्।तदयं॰राजावरुणोनुम
२ इदमग्नये॰ न्यतांयथेयं॰स्त्रीपौत्रमघंनरोदात्स्वाहा।१।इमामग्निस्त्रायतांगार्हपत्यःप्रजामस्यैनयतुदीर्घ
मायुः।अशून्योपस्थाजीवतामस्तुमातापौत्रमानंदमभिविबुध्यतामियं॰स्वाहा।इदमग्नयेन॰
२।स्वस्तिनोअग्नेदिवापृथिव्याविश्वानिधेह्ययथायजत्र।यदस्यांमहिदिविजातंप्रशस्तंत
दस्मासुद्रविणंधेहिचित्रं॰स्वाहा।इदमग्न॰।३।सुगंनुपंथांप्रदिशंनएहिज्योतिष्मध्येह्य
जरन्नआयुः।अपैतुमृत्युरमृतंमआगाद्वैवस्वतोनोअभयंकृणोतुस्वाहा।इदंवैवस्व
तायनमम।४।परंमृत्योअनुपरेहिपंथांयस्तेअन्यइतरोदेवयानात्।चक्षुष्मतेशृण्व
तेतेब्रवीमिमानःप्रजां॰रीरिषोमोतवीरान्स्वाहा।इदंमृत्यवेनमम।५।पंचमीप्राशनांते
वाईक्षितानदापुनरपिसंस्रवप्राशनं।अथलाजाहोमः।लाजाशब्देनभ्रष्टाव्रीहयः।कुमा
री।उत्थाप्य।उभाभ्यांपाणिभ्यामंजलिंकारयेत्।उपस्थापरदानीतेन:कुमार्यांभ्राताश
मीपलाशमिश्रान्लाजान्।अंजलिनागृहीत्वा।लोकाचारदर्व्यागृहीत्वा।कुमार्यंजलौआ

२ अर्यमणं मित्रस्या ओं पर्वणोनुष्टुप् अग्निर्लाजाहोमे वि॰ इ॰ वरत्रयाणां मन्त्र वि॰ २

आवपति। प्रत्युपस्तारं दानं। ततः कुमारी। अंजलिगृहीतानां लाजानां तृतीयांशं। तृतीयांशं
प्राजापत्येन तीर्थेन संहताभ्यां त्रिभिर्विधिहेर्जुहोति। तत्र मंत्रः। वरस्य। अर्यमणं देवं कन्या
अग्निमयक्षत स नो अर्यमा देवः प्रेतो मुंचतु मा पतेः स्वाहा। इदमग्नये न मम।१। तृतीयांशं
जुहोति। इयं नार्युपब्रूते लाजानावपंतिका। आयुष्मानस्तु मे पतिरेधंतां ज्ञातयो मम स्वाहा। इ
दमग्नये न मम।२। अर्हं जुहोति। इमां ल्लाजानावपाम्यग्नौ समृद्धिकरणं तव। मम तुभ्यं च संव
ननं तदग्निरनुमन्यतामियं स्वाहा। इदमग्नये न मम।३। सर्वं जुहोति। वरमंत्रत्रयं पाठः॥ दक्ष
उपलेकश्चिदुमामहेश्वरौ हथेवाल्लोमर्हनं। ततः वरकन्याहस्तलेपनं। वरकन्यायाः दक्षिण
पाणिं सांगुष्ठं ग्रहणं। दर्भमंतर्हीनमुत्कालनसाधनं पुण्याहे ३। आचार्योब्रवीत्। तातो हस्तं
ग्रहणमंत्रं। ओं गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः। भगो अर्यमा सवि
ता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः। अमोहमस्मि सा त्वं सा त्वमस्यमो अहं। सामाहम
स्मि ऋक् त्वं द्यौरहं पृथिवी त्वं। तावेहि विवहावहै सह रेतो दधावहै। प्रजां प्रजनयावहै पु

३ गृभ्णामि ते स्य मंत्रस्य प्रजापतिर्ऋषिः त्रिष्टुप् छन्दः द्यौर्देवता पाणिग्रहणे वि॰ ३

शिव॰
॥२०॥

५ आरोहेममे त्यस्य मंत्रस्य आथर्वणो नुष्टुप्छंदः अश्मा देवता अश्मारोहणे वि० ।५

७ सरस्वती त्यस्य मंत्रस्य विश्वावसुस्त्रिष्टुप् सरस्वती गाने वि० ७।

आश्विद्धावहे वहून्। ते सं तु जरदष्टयः संप्रियो रोचिष्णू सुमनस्यमानौ। पश्येम शरदः शतं जी

वेम शरदः शतं॰ शृणुयाम शरदः शतं। वरस्य मंत्रेण पाणिग्रहणं। ततो अश्मारोहयति आ

चार्य प्रैषं दत्वा इति। अश्मारोहणं तूष्णीं कन्यायाः कन्या दक्षिणपादेनारोहेममश्मानमि

त्यारोहणं कारयेति। वरस्य मंत्रः। अश्मन्प्रभृति रस्तु वरकन्यायास्तु पृष्ठतः। अनंतरं वर

कन्येति शंनोरिति वचनात्। मंत्रः। आरोहेममश्मानमश्मेव त्वं स्थिरा भव। अभितिष्ठ पृ

तन्यतो ववाधस्व पृतनायतः। अश्माया उपरि स्थितायां कन्यां गाथां गायति। मंत्रपाठो

वरस्यैव। सरस्वति प्रेदमव सुभगे वाजिनीवति। यां त्वा विश्वस्य भूतस्य प्रजायामस्या

ग्रतः। यस्यां भूतं समभवद्यस्यां विश्वमिदं जगत्। तामद्य गाथां गास्यामि यास्त्रीणामुत्त

मं यशः। अथ प्रदक्षिणं परिक्रामतो वरवध्वौ। मंत्रपाठो वरस्यैव। वराग्रे पश्चात् कन्यका

मिः। अग्नेः प्रदक्षिणं कृत्वा। मंत्रः। तुभ्यमग्रे पर्यवहंत्सूर्यां वहतुना सह। पुनः पतिभ्यो

जायां दाः अग्ने प्रजया सह। स्वस्थाने आगत्य। सूर्यपाठपाठ धुंदसुत्रायी। चतुष्टयपृ

२ तुभ्यमग्रे इत्यस्य आथर्वणो नुष्टुप् अग्नि[illegible] वि० २।

गिफलानि। बहूचब्राह्मणाय ददाति। ततो चत्वारो ब्राह्मणाः सर्षपाक्षं कुर्वन्ति। एवं द्विरपरं।
ॐ अर्यमणं० स्वाहा।१। इयं नार्युप० स्वाहा।२। इमांल्लाजा० स्वाहा।३। गृभ्णामि ते सौ० दः श
तं। अश्मारोहे० यतः।१। गाथां० सरस्व० यशः।२। परिक्रामणः तुभ्यमग्ने० सह।३। पुनः
एवमेव लाजाहोमः। अर्यमणं० स्वाहा।१। इयं नार्यु० म स्वाहा।२। इमांल्लाजा० स्वाहा।३।
हस्तग्रहणं। गृभ्णा० शतं। अश्मारोहणं। आरोहेम० यतः। गाथां० सरस्व० यशः। परि
क्रामणं। तुभ्यमग्ने० सह।३। एवं मंत्रावृत्तिरितित्रिः। चतुर्थपरिक्रमणस्यादौ। तूष्णीं
सर्वं उदकुम्भं दक्षिणेन ब्रह्मसदनमुत्तरेणाग्नेर्भ्रमणं। ततः शूर्पकोणेन तद्देशे
न सर्वांल्लाजान्कुमार्यै जलावावपति। भगाय स्वाहा।१। भगाय स्वाहा।२। भगाय स्वा
हा।३। इति मंत्रेण पूर्ववज्जुहोति। वारत्रयं। तूष्णीमश्मारोहणं। अत्र वरस्याङ्गुष्ठं वधू
र्माता दृषदोपरि उपले। अत्र गाथागानं भवति। परिक्रमणं। स्वस्थाने उपविश्य।
ताभ्यां अन्वारब्धे जुहोति। आज्येन होमः। ॐ प्रजापतये स्वाहा। इदं प्रजापतये न०।

२१

३ आ

३ इदं भगाय०

द्विरपि धारा०

शिव.

५ आपः शिवा इति प्रजापतिर्यजुरापोऽभिषेचने वि॰ ५ २ तत्र सर्वत्र प्रजापतिर्यजुर्लिङ्गोक्ताः भूक्रामे लोवि॰ २
१ आपो हि ष्ठेत्यादेः सिंधुद्वीपो गायत्री आपो मार्जने वि॰ १ १८ तच्चक्षुरिति दध्यङ्‌ पुर उष्णिक्सूर्यनिरीक्षणे वि॰ ८

अथैनां वधूं उदीचीं दिशं सप्तपदानि प्रक्रामयति। व्रीहिभिः सप्तमुष्टिभिः। अग्नेरुत्तरदि
ग्भागे उत्तरसंस्थं स्थापनं कृत्वा। लोकरीत्यां ताम्रनाणकं निक्षिप्य। मंत्रः। एकमिषे विष्णुस्त्वा
नयतु। १ द्वे ऊर्जे विष्णुस्त्वा नयतु। २ त्रीणि रायस्पोषाय वि॰ ३ चत्वारि मायोभवाय वि॰ ४
पंच पशुभ्यो वि॰ ५। षडृतुभ्यो वि॰ ६। सखे सप्तपदा भव सा मामनुव्रता भव विष्णु॰ नु॰ ७।
एवं प्रतिमंत्रं एकैकपदं रापयत्युत्तरोत्तरं दक्षिणपादेन। ततः स्कंधे कृत्वा उदकुंभादुदकमा
दाय। वधूमूर्द्धन्यभिषेकं कुर्यात्। तत्र मंत्राः। आपः शिवाः शिवतमाः शांताः शांततमा
स्तास्ते कृण्वंतु भेषजं। १ आपो हि ष्ठा॰ चन। कांडी ३। ततः सूर्यमुदीक्षस्व इति आचा
र्यप्रैषः। ततः सूर्येक्षणं वध्वाः मंत्रः। तच्चक्षुर्दे॰ तान्त। १ इति वध्वा एवं मंत्रपाठः। ततो
वरवध्वा याः दक्षिणांसस्योपरि हस्तं नीत्वा हृदयमालभते। मंत्रः। मम व्रते ते हृदयं
दधामि मम चित्तमनु चित्तं ते अस्तु। मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नि
युनक्तु मह्यं। १ इति। अथैनां वधूमभिमंत्रयते। मंत्रः। सुमंगलीरियं वधूरिमां समेत प

१ सुमंगलीरित्यस्य प्रजापतिरनुष्टुप्‌ विवाहा[illegible]षा[illegible] ३ मम व्रते इत्यस्य परमेष्ठी त्रिष्टुप्‌ प्रजापतिर्हृदयालंभे नैवि॰
[illegible]मिमंत्रणे वि॰ विवाहदेवता॰ १

इहगावइति मंत्रे प्रजापतिरनुष्टुप्लिंगोक्ताउपवेशने वि॰

ततः

श्यत। सौभाग्यमस्यै दत्वा याथास्तं विपरेतन॥ २॥ अग्नेः शाकटद्वा। अपर्यापिंईशान्यां दिशि चतुरिकामध्ये। शाकटेन अनुगुप्तदेशाकरणं। तन्मध्ये आनडुहचर्मनिधानं रोहितं॥ प्राग्रीवमुपस्थिउत्तरलोमास्तीर्णमिवंति। तदुपरि भ्रात्रादिसंबंधिनः। तां वधूमुन्मथ्य। एतस्मिन्परिवृते चर्मणि उपवेशयति। मंत्रः। इहगावो निषीदंत्विहाश्वा इह पूरुषाः। इहो सहस्रदक्षिणो यज्ञ इह पूषा निषीदंतु। इति दृढपुरुषस्य पाठश्च चर्मण्युपवेशने। केषां मते यामाता दृढपुरुषइति। ततश्च यामातैवोक्तिय मंत्रमुक्त्वा चर्मण्युपवेशयति। आगत्य स्थानेउपविशति। अन्वारब्धे होमः। ॐ अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते न मम। संस्रवभक्षः। एकः पक्षे परमृत्यो विति अत्र होमः। परमृत्यो॰ स्वाहा। २। ततस्ते पुनः संस्रवभक्षः। मार्जनं। पवित्रप्रतिपत्तिः। ब्रह्मणो वरदानं। अस्य विवाहोत्तरे परिपूर्णार्थं दास्यमानं पूर्णपात्रं सहिरण्यं ब्रह्मन् तुभ्यमहं संप्रददे। न्यूनातिरिक्तदोषपरिपूर्णार्थं सर्वप्रायश्चित्तहवनमहं करिष्ये। भूः॰। भुवः॰। स्वः॰। भूर्भुवः स्वः॰। त्वन्नः॰। स त्वं

शिव
॥२२॥

सत्वन्तः। अयाश्चाग्ने। येते शतं। उदुत्तमं। अथ आचार्याय वरदानं। अस्य विवाहोत्सव
कर्मणः सांगतासिध्यर्थं दास्यमानां गां रुद्रदैवतां यथोपस्कर सहितां आचार्याय तुभ्यमहं
संप्रददे। गौर्ब्राह्मणस्य वरः। ग्रामो राजन्यस्य। अश्वो वैश्यस्य। वधूवस्त्रं सूर्यपाठकेभ्यः पंच
मे दिवसे ददाति। अभ्यात्मत्या अश्विरथं गजवाशतं जामाता श्वशुराय देयात्। ततः अ
स्तमिते आचार्यः ध्रुवमुदीक्षस्वं इति प्रैषः करोति॥ ततः वधूः ध्रुवदर्शनं करोति। दिवा
चेद्विवाहः तथापि अस्तमिते ध्रुवदर्शनं। मंत्रः। ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधि पोष्ये म
यि मह्यं त्वादाद्बृहस्पतिर्मया पत्या प्रजावती संजीव शरदः शतं। इति सा कन्या यदि न
पश्येत् पश्यामि इत्येवं ब्रूयात्। विवाहे ग्रामवचनं च कुर्युः। ग्रामशब्देन वृद्धाः स्त्रियः। वि
वाहश्मशानयोर्ग्रामं प्रविशतादिति वचनात्तस्मात्तयोर्ग्रामः प्रमाणमिति श्रुतेः॥
ततो बर्हिर्होमः स्रुवेण। दिव्यायनभसे स्वाहा। इदं दिव्यायनभसे न मम। प्रणीता वि
मोकः। ब्राह्मणभोजनसंकल्पः। अस्य विवाहोत्सवकर्मसांगतासिध्यर्थं यथाशास

पञ्चे नांनेन तृप्तिपर्यंतेन भोजनेन। ब्राह्मणमेकमर्हंतं परियिष्टो। तेन भगवतः कर्मांगिदेवताः
प्रीयंतां। ततो कर्मापवर्गे स्विष्टिहोमः। उत्सर्जनं ब्राह्मणेः। उपयमनकुशाग्नौ प्रक्षेपः। सहै
षयज्ञऽउवाच। ॰यति। १ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव च। आहूयते च पुनर्द्वाभ्यां
तस्मै यज्ञात्मने नमः। पुष्पाहूतैर्वर्धापनं। श्रीयज्ञपुरुषाय नमः॥ इति विवाहकर्मसमा
प्तः॥ विवाहोदारभ्य त्रिरात्रमक्षारलवणाशिनौ स्यातां। वरवध्वौ। अधःशायीयातां सं
वत्सरपर्यंतं मिथुनप्रतिषेधः। द्वादशरात्रौ षड्रात्रं त्रिरात्रमंततृशति। मिथुनाऽर्थैक
णशास्त्रा। पेठ्ठया एतेकल्पाः। त्रिरात्रपक्षे प्राश्नीयमाणे चतुर्थ्युत्तरकाले पंचम्यां रा
त्रसंवमिगमनं कर्तव्यं। तत्कर्मण्यकृते भार्यात्वामवनाद्यापि सहूसंवृत्तं। चतुर्थीक
र्मणो विवाहैकदेशत्वात्। ततः चतुष्टयदिनपर्यंतं वरवध्वावन्योन्यं शर्करायाः क
ण्ठं कपूलं करेणेति। ततो सर्वेषां वृद्धानां नमस्काराः। ततः द्वितीयादिवसे मंडपाचारः।
वधामणं। गुडमेली। एकोत्तरशतरूप्या। उदकपूर्णकिरकपात्रं। शमी। मिश्रा। व्रीहि

चतुरिकामध्ये वरवध्वावुपविशतः। उत्तरीयासन्निधाने। द्वयोर्वधूनां चतुर्थहारारोपितं। सम्य
ग्जुः सामाऽथर्वणा चाशीर्वादपठनं। विश्वानि० १। मंत्रार्थाः० वाच्यंते। कन्यापक्षैः मात्रादिना सक
लयुवतीभिर्वरकन्यायाः। वस्त्रादिना। उमामहेश्वरपूजनं करोति। ततः वरस्य माता किंचिद्
भ्रमणेन कन्यायाः मुखनिरीक्षणं करोति। ततः सर्वैर्वरपक्षस्थैः द्रव्यादिना कन्यानिरीक्ष
णं करोति। ततः आचार्येण वरवधूहस्ते गुडभेली दत्वा। आचार्यस्तिष्ठन् ताम्रपात्रं गृ
हीत्वा। कन्याभ्राता उदकपूरणं। करकपात्रं गृहीत्वा। वरभ्राता वस्त्रधारणं करोति केचिद्बु
हिर्गृह्यते। ततः उत्कृष्टपत्रिकापाठनं। पत्रिकावाच्यमाने। वस्त्रमध्ये करकात् उदकं निनयति।
ततः व्रीहीन् अवकीर्यंति। नमस्कारः। भोभो श्रूयतां। वरंपातु। रुद्रस्तु कुलदेव्याः रुक्ष्मोऽवरगुलमेली।
भोभो० तुवेरि मातामहीप्रत्यक्तपरिधानं। भोभो० तुवेरी पितामहीप्रत्यक्तपरिधानं। भोभो० तुवे० माता
महप्रत्यक्तमंडपहेठहिरेव निष्क्रयते एकोत्तरसोरुआ। भोभो० तुवे० पितामहप्रत्य० आ। मृतश्वेता
स्वर्गस्थितहि० आ। भोभो० तुवे० मातृमातुलैः सर्वैः एवमेव भोभो० तुवे० पितृक्षेमातुलैः सर्वैः एवमेव।

बे·मातृपितृव्यकसर्वैः। बे·पितृपितृकसर्वैः। बेटीमातुलसर्वैः। बेटिपितृव्यकसर्वैः। बेटीभ्राता।
सर्वैः एवमेव। पश्चात्सेह्रामली। ततः मंडपध्येमहत् आसनं मुक्त्वा। तदुपरि कन्यापिता भागि
नेयो उपवेशनं करोति। तस्य कुंकुमेन लेपनं कृत्वा वस्त्रं ददाति। एवं सर्वपूज्यः वस्त्राणि ददाति।
पश्चात् हृरपूज्याय वस्त्राणि ददाति। एवमेव ततो वरपक्षस्यैः सर्वैः आसनोपरि उपवेश्य पूजां कृ
त्वा। यथायोग्यानि वस्त्राणि ददाति। ततो वरस्य पिता मातुल उपविशति। कन्याभ्राता आसनं च
लनं करोति। तस्य बहुः कुंकुमेन लेपनं कृत्वा। पदकूलं समर्पयेत्। ततः भो भो॰ नु। बेटीपिता देव
दत्तसकुटुंबसपरिवारमस्य चर्म॰ ते २॰१ बसे एको तेर सो रुआ। भो भो॰ नु। बेटीमातृमातुल
स्य। बे·पितृमातुलस्य। बे·मातुलस्य। बेटीपिताकस्य। चतुष्टय अवटंकं पठंति। एतत्कश्चित्।
एभिः स्वगोत्रैः संतोषः कर्त्तव्यः। ततः आसनस्योपरि वरपितामहान्संतोषः॥ इति पठंति। ततः युव
ती निर्गमनं करोति। ततः वरवधू दीपं नमस्कृत्य। द्वारे आगत्य तिष्ठति। ततः कन्यापक्षस्यैः स
र्वैर्वध्वोर्नमस्कारं करोति। तेषां सर्वेषां मस्तके वरः अक्षतान्क्षिपेत्। ततः वरपिता कन्या
पितापरस्परेण श्लोकैः स्तुतिं कुर्वंति। अथ श्लोकाः। यपेंदिरामाप्यतु तोषकेश वो रत्नमस्तु ते र

मृतं यथास्मुराः। वरस्तथा सत्कुलकन्यका मिमां संबंधिनः प्राप्य भवाद्दृशा वयं॥१॥ सुतैव जाता सुतज
न्मनो वरं ममैष तत्को हि हृदये व्यवस्थितः। अघौघविध्वंसविधौ समर्था भवाद्दृशोऽयं कुरु मागतायतः॥
कन्यायेन सवाससा सकनका दत्ता वरेण्याय वरेदत्तातेन सपर्वता वसुमती द्वीपार्णवैः संयुता॥ इत्थं तेन
सदक्षिणं क्रतुशतैस्तीर्थावगाहः कृतस्तेनैको त्तरतारितं कुलशतं संसारघोरार्णवात्॥२॥ जाताजन्म
कृता यत्ता विकसितं पुण्यांबुजानां वनं लीलाः संप्रति सर्वपापपटली दुःखांधकारो गतः॥ आनंदांकुर
कोटिताविपारवी प्राप्ता सत्संगे भवतां कृते सुकृतिनां किं किं न लब्धं मया॥२॥ इति॥ ततः वरवधू
यो गृहे आगते सति यानभंगे वधूनयनं इदं प्रायश्चित्तं यस्मिन्स्थानेऽक्षभंगे सद्यते तस्मिन्नुड
पलिप्य उद्धृतावोक्षिते विवाहाग्निमुपसमाधाय। आज्यभागांते विशेषः। आज्यस्थालीद्वयं दक्षि
णार्थं पृथुयोर्दक्षिणा द्वितीय आज्यसंस्कार निर्वापः। अधिश्रयणं। पर्यग्निकरणं। उद्वासनं। उ
त्पवनं। अवेक्षणं। इह रतिः स्वाहाकारांते होमः। इदमग्नये त्यागः। उपसृजं धरुणमिति हुती
यो हुतिः। इदमग्नये। महाव्याहृत्यादि दक्षिणादानांतं। अन्यथानोपकल्पनं। तस्मिन्वरस्योपवे
शनं। वधूं च प्रतिष्ठाप्य इतियज्ञांते नान्वाहार्यमिति चाबर्हिर्होमादि ब्राह्मणभोजनांतं॥ इति अ

भेदप्रायश्चित्तं। ततः वरस्य गृहे आगते भिटभणाई। नाम आचारः। परस्परं कुंकुमलेपनं कृत्वा। नालिकेरं दद्यात्। अन्योऽन्यं वर्द्धापनं। भोजनार्थं निमंत्रणं करोति। अन्योऽन्ये हास्यं कुर्वंति॥ नमस्कारं अन्योऽन्यमिति च। ततो वरपिता सकुटुंबः सपरिवारसहितः कन्यागृहे आगत्य रात्रौ भोजनार्थं गच्छंति। तत्र सुगंधतैलाभ्यंगं कृत्वा उष्णोदकेन स्नानं कुर्वंति। दीर्घचतुरस्रकाष्ठपीठे परिधापविशेषात्। ततः कांचननिर्मितोस्थाली चतुःषष्टिकचोलानां सुघटितेन भोजनं कुर्वंति। तत्र पायसं चंद्रसंकाशं शर्करया युतं। भक्तं कुंदवर्णाभं सुगंधकांचनप्रभान्। नानाव्यंजन निंबरसेन चार्द्रकामरीचिपिप्पलीसहितेन। द्राक्षा॥ शिंशिपा। चूतकरमर्द्दकपित्थिकाम्लहल्लाः वर्त्तुमंडलाः। कथितं दुग्धं सितया सहितं। मधुवर्णसुवासितं गव्यघृतं सुवर्जिकापूरिकाशतछिद्रापूपिका। पर्पटाः। हिंग्वादिजीरमरिचैर्लवणेन मुद्गतैलेन पूरिता कुवराः कुंकुमाभाः। दधिदुग्धद्राक्षारसयुतेन शिखरिणी तापसीकाः फेणिकाः। सूत्रसंभूतामोदकाः। मौक्तिकाः रंभाफलं। कांजिका। इत्यादि लेह्यपेयचोष्यखाद्येन। भोजनं कुर्वंति। शुद्धाचमनं कृत्वा। एलाचीलवंगखदिरचूर्णपूंगिफलकर्पूरवासितसहि

तेनतांबूलचर्वणंकरोति।वरगृहान्मुखवर्त्तःपश्चाद्राज्ञांकृत्वास्वगृहेगच्छंति।इतिमंडवसो
नामआचारः।ततःचतुर्थेदिवसेअपररात्रेचतुर्थीकर्मक्रियते।तत्रविधिः।गृहमध्ये
स्थंडिलंकृत्वा।उपलिप्य।उद्धृत्य।अभ्युक्ष्य।विवाहाग्निमुपसमाधाय।दक्षिणतोब्रह्मा
सनं।उत्तरतःप्रणीतासनं।तत्रदक्षिणतः।सत्यकृब्रह्मणःउपवेशनं।उत्तरतःउदपात्र
निधानं।प्रणीताःप्रणयनं।परिस्तरणं।अर्थवत्पात्रासादनं।पवित्रछेदनानित्री
णि।पवित्रेद्वे।प्रोक्षणीपात्रं।आज्यस्थाली।चरुस्थाली।संमार्गकुशाः।उपयमनकु
शाः।विंशतिसमिधः।स्रु।स्रुवः।आज्यं।तंडुलाः।बर्हिः।पूर्णपात्रंवा।अग्रहणं।प्रजापत
येजुष्टंगृह्णामि।वारत्रयं।चतुर्थंतूष्णीं।शिखाभिमर्शनं।वाग्यमनं।पवित्रकरणं।
पवित्रछेदनं।प्रोक्षणीपूरणं।पवित्रेकृत्वाप्रोक्षण्युत्पवनं।सव्यहस्तकरणं।दक्षि
णेनोद्दिंगयनं।प्रोक्षणीः।प्रोक्षणं।चरुःप्रोक्षणं।प्रजापतयेत्वाजुष्टंप्रोक्षामि।त

त्नीपात्राणां प्रोक्षणं। असंचरे प्रोक्षणीर्निधाय। वाग्विसर्गः। निरूप्याज्यं। चरुस्थालीः प्रक्षा
लनं। आज्याधिश्रयणं। चतुर्थेनोदकेन श्रपणं। उभयोः पर्यग्निकरणं। उदकोपस्प
र्शः। शृतेः स्रुवः प्रतपनं। संमार्गकुशैः संमार्जनं। प्रोक्षण्युदकेन प्रोक्षणं। पुनः प्रतपनं
निदध्यात्। उदगाज्यमुद्वास्य। अपरं प्रोक्षणीभ्यः। पवित्राभ्यामाज्यमुत्पवनं।
आज्यावेक्षणं। अपद्रव्यनिरसनं। प्रोक्षणीश्च पूर्ववदुत्पवनं। ब्रह्माणमीक्षणं। समि
द्विस्रंसस्य प्रोक्षणं। वेदिः प्रोक्षणं। बर्हिर्गृह्य। ब्रह्माणमीक्षणं। वेद्यां कृत्वा बर्हिः
प्रोक्षणं। सशेषो मूलावसेकः। पवित्रे निधाय प्रणीतासु। बर्हिर्विस्रंस्य। त्रिरस्तर
णं। चरोरभिघारणं। उद्वासनं। भूतानां तु पूर्वेण। उद्वासितानां तु पश्चात्। प्रागग्रा
नां वेद्यामासादनं। आलंभनं। आलालंभनं। उत्कालंभः। तूष्णीमन्वारब्धः। उत्त।
उपयमनान् कुशानादाय तिष्ठन् समिधोऽभ्याधाय। प्रोक्षणीशेषेण पर्युक्षणं। जुहुयात्।

ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम। प्रोक्षण्यां संस्रवप्रक्षेपः। इंद्राय स्वाहा। इदमिंद्राय।
अग्नये स्वाहा। इदमग्नये। सोमाय स्वाहा। इदं सोमाय। अग्ने प्रायश्चित्त इति पंचाज्याहुत
यः। हुत्वा हुत्वा उदकपात्रे संस्रवप्रक्षेपः। ॐ अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मण
नाथकाम उपधावामि यास्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा। इदमग्नये। वायो प्रा
यश्चित्ते त्वं देवा० यास्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा। इदं वायवे। सूर्य प्रा
यश्चित्ते त्वं देवा० यास्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा। इदं सूर्याय। चंद्र प्रायश्चि
त्ते त्वं देवा० यास्यै गृहघ्नी तनूस्तामस्यै नाशय स्वाहा। इदं चंद्रमसे। गंधर्व प्रायश्चि
त्ते त्वं देवा० यास्यै यशोघ्नी तनूस्तामस्यै नाशय स्वाहा। इदं गंधर्वाय। ततः स्थालीपा
केन होमः। प्रजापतये स्वाहा। इदं प्रजापतये। वरस्य देवतात्यागः। उदपात्रस्योदक
मादाय संस्रवमिश्रं वध्वायाः मूर्द्ध्न्यभिषिंचति। या ते पतिघ्नी प्रजाघ्नी पशुघ्नी गृहघ्नी
यशोघ्नी निंदिता तनूर्जारघ्नीं तत एनां करोमि सा जीर्य त्वं मया सह। अमुकी देवि

दांनामादेशेनवध्वावरस्यमंत्रः। स्थालीपाकेनप्राशनंवध्वाः। मंत्रः। प्राणैस्तेप्राणांसं
दधामि।१। अस्थिभिरस्थीनिसंदधामि।२। मांसैर्मांसानिसंदधामि।३। त्वचात्वचंसं
दधामि।४। इतिमंत्रः। अन्योन्यंवरवध्वोः चरुभक्षणंकुर्वंति। आचारप्राप्तत्वात्। ततोम
हाव्याहृतिहोमः। भूः॰। भुवः॰ स्वः स्वा॰। त्वंनोअ॰स्मत्स्वाहा। सत्वंनो॰धिस्वाहा। अयाश्चा
ग्ने॰षज॰स्वाहा। येतेशतं॰स्वर्काः स्वाहा। उदुत्तमं॰स्यामस्वाहा। प्रजापतयेस्वाहा॥
इदंप्रजा॰। यथादैवतंत्यागाः। ततः आज्येनस्विष्टकृत्। अग्नयेस्विष्टकृतेस्वाहा। इद
मग्नयेस्विष्टकृतेनमम। संस्रवप्राशनं। मार्जनं। पवित्रप्रतिपत्तिः। ब्रह्मणेवरदानं।
अस्यचतुर्थीकर्मणः सांगतासिध्यर्थंदास्यमानंपूर्णपात्रंसहिरण्यंब्रह्मन्तुभ्य
महंसंप्रददे। तेनश्रीकर्मं॰तो। न्यूनातिरिक्तदोषपरिहारार्थंसर्वप्रायश्चित्तहवनम
हंकरिष्ये। भूः॰। भुवः॰। स्वः॰। भूर्भुवः स्वः॰। त्वंनः॰। सत्वंनः॰। अयाश्चाग्ने॰। येतेशतं॰।
उदुत्तमं॰। यथादैवतंत्यागाः। ततोवर्हिर्होमः। दिव्यायनभसेस्वाहा। इदंदिव्यायनभ

स्तिनममा। प्रणीता विमोकः। ब्राह्मणभोजनसंकल्पः। अस्य चतुर्थीकर्मणः सांगता
सिध्यर्थं यथासंपन्नेनान्नेन तृप्तिपर्यंतेन भोजनेन ब्राह्मणमेकं अहं तर्पयिष्ये। ते
न भगवतः कर्मांगदेवताः प्रीयतां। कर्मापवर्गे समिद्धोमः। उत्सर्जनं ब्रह्मणः। उपयम
नकुशाग्नौ प्रक्षेपः। ततः वरवध्वायाः कुंसुंभरंगैः कंचुकीपरिधानं कारयेत्। मांग
ल्यं कृत्वा। ततः स्वसुवासिनीभ्यः वरवध्वाभ्यां वर्द्धापनं करोति। अथ भूयसी दक्षि
णा संकल्पः। अस्य चतुर्थीकर्मणः सांगता सिध्यर्थं न्यूनातिरिक्तदोषपरिहारा
र्थं इदं स्वयमानो भूयसीं दक्षिणां नानानामगोत्रेभ्यो ब्राह्मणेभ्यः अहं संप्रदास्ये।
यो यो विभागः संप्रतिगृह्यतां। दक्षिणाः पांतु इत्यादि०। उत्तरे कर्मण्यविघ्नमस्तु।
मतः पुण्याहं दीर्घमायुरस्तु। शिवा आपः संतु। सौमनस्यमस्तु। अक्षतं चा
रिष्टं चास्तु। दीर्घमायुरस्तु। शांति०। पुष्टि०। तुष्टि०। वृद्धि०। धनधान्यसमृद्धिरस्तु।
इष्टसंप०। अनिष्टनिर०। यत्पापं रोगं०। द्विपदे च०। अस्य चतुर्थीकर्म०। स्तु। ग०। उ०। स्तु।

॥ततः वरवध्वौ अस्तनान्गृहीत्वा। अग्निवर्द्धपियेत्। स ह वै षयज्ञः उवाच। ० पतिः। चतुर्भिश्च
चतुर्भिश्च द्वाभ्यां पंचभिरेव च। हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः। श्रीयज्ञ
पुरुषाय नमः॥ ततः आशीर्वादः। विश्वानि देव सवितर्दुरितानि परासुव। यद्भद्रं त
न आसुव। मंत्रार्थाः सफलाः सन्तु मनोरथाः। शत्रूणां बुद्धिनाशोऽस्तु मित्राणा
मुदयस्तव। ऋग्वेदो यजुर्वेदः सामवेदः अथर्वणः। ब्रह्मवर्चस्तथा नित्यं निम्रं
तितव शात्रवान्॥ इति चतुर्थीकर्मसमाप्तं। ततः रात्रौ पुत्रवतीभिर्भित्वा चत्वारपूजां
करोति। चंदनादिनोपकान्नादिनैवेद्यं तत्र पुत्रवतीभिः अष्टाहेलास्यं कुर्वन्ति। रात्रौ जा
गरणं कारयेत्। एवं द्वितीयदिने वरगृहे चत्वारपूजां पूर्ववत्कृत्वा। तत्र दृष्टमूर्ती
पुत्रं कृत्वा वध्वायाः ददाति। वरवध्वौ परस्परे नामग्रहणं कृत्वा हास्यं कुर्वन्ति। एवं जा
गरणं करोति। परस्परं कंकणं दूरीकरोति। ततः अष्टमे दिवसे मांडवेल्युनाम आ
चारः। मांडकां कृत्वा। गोत्रदेव्याये नैवेद्यं कृत्वा। मंडकेन मंडपाच्छादनं करोति। ततः

सपरिवारैः भोजनं कुर्वीत। एवं द्वितीयदिवसे वरगृहे मंडपाच्छादनं करोति। ततः रात्रौ अने
कभेरीमृदंगनानावादित्रवाद्यमानेन। हवाडी चरखीडत्यादिकृत्वा स्वर्णमयंमुकुटं मस्त
के धृत्वा। वरः अश्वारूढो स्वजनैः परिवृतः। हट्टमार्गवीथ्यां भ्रमयित्वा स्वगृहे आगच्छ
ति। ततः पुण्याहं दीर्घमायुरस्त्वित्यादि॰ अभिषेकः। आशीर्वादाः ॥ ६ ॥ विश्वानि॰ सुवा
मं त्वार्या॰ स्तव। ३ ॥ स्वेदो॰ ज्ञानवान्॥ ॥ ॥ इति विवाहः समाप्तः॥ ॥ स्वस्ति संवत् १८द्वादशश
तदशाधिक तमे वै शेमाघकृष्ण अमावास्यायां बुधे लिखितं मिदं वाराणसी क्षेत्र परस्थु
रामेश्वरसमीपे आभ्यंतरनागरज्ञातीयश्रीमद्याज्ञिकसर्वात्मज याज्ञिकदेवकृ
ष्णात्मज विजयकृष्णभ्रातृकरुणाकृष्णेन भ्रातृरवीकृष्णस्यार्थे। शुभं। कल्याणं॥
लेखकपाठकयोः शुभं॥ स्वार्थं परार्थं च॥ यादृशमितिन्यायान्नमे दोषः॥ ॥ श्रीकृ॥

शिव

॥यज्ञारंभेषु मे कर्मैकन्यापाणिग्रहेषु च। पत्नीदक्षिणतः श्रेष्ठा अन्येषां च विवर्जिता। आद्ये
सज्ञा वा वामांगे पादप्रक्षालने स्मृतौ। नांदीमुखे च पत्नीनां दक्षिणे मधुपर्कयोः। चतुर्थी
कर्मक्रियते चरुभक्षे तथैव च। आशीर्वचनकाले पुत्र ध्रुवा वामांगमाश्रये इति॥

॥श्रीमद्याज्ञिकदेवकृलस्येदं पुस्तकं॥पत्र २९॥

पश्चिम

वायव्य

उत्तर